# Shri Vighnaraja Stuti Shrivishnurkrita

# શ્રીવિષ્ણુર્કૃતા શ્રીવિઘ્નરાજસ્તુતિઃ

## Document Information

Text title : Shri Vighnaraja Stuti Shrivishnurkrita

File name : vighnarAjastutiHshrIviShNurkRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM saptamaH khaNDaH | adhyAyaH 12 | 7.12 27-50||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 5, 2024

*sanskritdocuments.org*

# શ્રીવિષ્ણુર્કૃતા શ્રીવિઘ્નરાજસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
શ્રીવિષ્ણુરુવાચ ।
નમસ્તે વિઘ્નરાજાય વિઘ્નાનાં વિઘ્નકારિણે ।
મહાવિઘ્નપ્રશાન્તાય દેવદેવેશ તે નમઃ ॥ ૨૭॥
અનાદયે પરેશાય સર્વાઽઽદૌ સંસ્તુતાય ચ ।
સર્વેભ્યો વરદાત્રે તે વરદાય નમો નમઃ ॥ ૨૮॥
વિનાયકાય સર્વેષાં નાયકાય પરાત્પર ।
ઢુણ્ઢિરાજાય વેદાદિઢુણ્ઢિતાય નમો નમઃ ॥ ૨૯॥
સર્વેભ્યઃ સ્વસ્વરૂપેણ સુખદાય પરાત્મને ।
આનન્દાયાપ્રમેયાય બ્રહ્મણે તે નમો નમઃ ॥ ૩૦॥
ગણાનાં પતયે તુભ્યં નાનાગણસુરૂપિણે ।
સદા સ્વાનન્દનાથાય સિદ્ધિબુદ્ધિપતે નમઃ ॥ ૩૧॥
બ્રહ્મણે વિષ્ણવે તુભ્યં શક્તયે શઙ્કરાય ચ ।
ઇન્દ્રાદિદેવરૂપાય કલયા તે નમો નમઃ ॥ ૩૨॥
મુનયે ક્ષેત્રરૂપાય વૈશ્યાય શૂદ્રરૂપિણે ।
પશુપક્ષ્યાદિરૂપાય વર્ણાશ્રમયુજે નમઃ ॥ ૩૩॥
નાગાય સુરરૂપાય રાક્ષસાય વિહારિણે ।
ચરાચરમયાયૈવ શૂર્પકર્ણાય તે નમઃ ॥ ૩૪॥
ત્રિનેત્રાય ત્રિશૂલસ્ય ધારકાય ચ ચક્રિણે ।
પાશાઙ્કુશધરાયૈવ હેરમ્બાય નમો નમઃ ॥ ૩૫॥
નમસ્તે પરેશાય સર્વાત્મકાય સદા બોધરૂપાય નૈરઞ્જનાય ।
અયોગાય સંયોગમાયાધરાય જનેભ્યઃ સુશાન્તિપ્રદાયાથ ધામ્ને ॥ ૩૬॥
કિં સ્તૌમિ ત્વાં ગણાધીશ યત્ર વેદાશ્ચ યોગિનઃ ।
વિસિસ્મિરે સુશાન્તિસ્થાઃ શાન્તિરૂપાય તે નમઃ ॥ ૩૭॥
યજ્ઞાહા નિહતઃ સ્વામિંસ્તેન દેવર્ષયો વયમ્ ।

રક્ષિતાઃ સર્વભાવેન પ્રાણદાતર્નમો નમઃ ॥ ૩૮॥
ભક્તિં દેહિ ગણાધીશ તવ પાદામ્બુજેઽમલામ્ ।
તયા વયં ચ યોગેશ બન્ધહીના ભવામહે ॥ ૩૯॥
એવમુક્ત્વા પ્રણેમુસ્તં દેવા મુનિસમન્વિતાઃ ।
તાંસ્તથેતિ જગાદૈવાંઽતર્દધે શૂર્પકર્ણકઃ ॥ ૪૦॥
તત્ર મૂર્તિં સમાસ્થાય શૂર્પકર્ણસ્ય સર્વદામ્ ।
પૂજ્ય સ્વસ્થાનગાઃ સર્વે બભૂવુર્વિગતજ્વરાઃ ॥ ૪૧॥
સ્વસ્વાચારસમાયુક્તં બભૂવ હ ચરાચરમ્ ।
એવં ચકાર વિઘ્નેશો નાનાદૈત્યવિહિંસનમ્ ॥ ૪૨॥
અવતારા અસઙ્ખ્યાતા વિઘ્નરાજસ્ય શોભને ।
તેષાં વક્તું ચરિત્રાણિ ન સમર્થાઃ શિવાદયઃ ॥ ૪૩॥
સઙ્ક્ષેપેણ મયા તસ્યાઽવતારાઃ કથિતાઃ પરાઃ ।
ભજસ્વ તં વિધાનેન તદા શાન્તિમવાપ્સ્યસિ ॥ ૪૪॥
રજોયુક્તં યથા ધાન્યં રજોહીનં કરોતિ ચ ।
નરૈઃ સંસાધિતં શૂર્પં યોગ્યં ભોજનકાદિષુ ॥ ૪૫॥
તથા માયાવિકારેણ યુક્તં બ્રહ્મ ન લભ્યતે ।
ત્યક્ત્વોપાસનકં તસ્ય શૂર્પકર્ણસ્ય સુન્દરિ ॥ ૪૬॥
શૂર્પકર્ણં સમાશ્રુત્ય મલં ત્યક્ત્વા હૃદિ સ્થિતમ્ ।
બ્રહ્મૈવ નરજાતિસ્થઃ શૂર્પકર્ણસ્તતઃ સ્મૃતઃ ॥ ૪૭॥
(ફલશ્રુતિઃ)
બ્રહ્મદઃ શૂર્પવત્ હૃત્સ્થો વેદેષુ કથિતો ભવેત્ ।
તં ભજસ્વ વિધાનેન શાન્તિયુક્તા ભવિષ્યસિ ॥ ૪૮॥
શૂર્પકર્ણાવતારસ્ય કથિતં ચરિતં મયા ।
યજ્ઞાઘ્નસ્ય વધાર્થાય બભૂવે દેહધારકઃ ॥ ૪૯॥
ય ઇદં શૃણુયાદ્વાઽપિ પઠેદ્વા પાઠયેન્નરઃ ।
સ માનસેપ્સિતં લબ્ધ્વા સુખી ભવેન્નિરન્તરમ્ ॥ ૫૦॥

ઇતિ શ્રીવિષ્ણુર્કૃતા શ્રીવિઘ્નરાજસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં સપ્તમઃ ખણ્ડઃ । અધ્યાયઃ ૧૨ । ૭.૧૨ ૨૭-૫૦॥

- .. mudgalapurANaM saptamaH khaNDaH . adhyAyaH 12 . 7.12 27-50..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Vighnaraja Stuti Shrivishnurkrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*